International Journal of Sanskrit Research 2020; 6(2): 12-17

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(2): 12-17
© 2020 IJSR
www.anantaajournal.com
Received: 08-01-2020
Accepted: 12-02-2020

**Dr. Naveen Bhat**
Uppinapattana Lecturer in Sanskrit.
MIMS & MIPU College Banglore,
Karnataka, India

**Corresponding Author:**
**Dr. Naveen Bhat**
Uppinapattana Lecturer in Sanskrit.
MIMS & MIPU College Banglore,
Karnataka, India

# भरतमुनिः तस्य नाट्यशास्त्रम्” एकं विमर्शात्मकमध्ययनम्

**Dr. Naveen Bhat**

## प्रस्तावना

संस्कृतभाषायां विद्यमानेषु सर्वेषु शास्त्रेषु ज्ञानगङ्गाप्रवाहः वर्तत इति विचारः सर्वैर्विदितमेव। तत्र नाट्यशास्त्रं पञ्चमो वेद इति सुविज्ञातमस्ति। न केवलं भारतीयाः किन्तु पाश्चात्याः अपि अस्माकं नाट्यशास्त्रीयग्रन्थान् गौरवादरेण पश्यन्ति। तेषां “Theater” इति यः शब्दोऽस्ति तस्य वैज्ञानिकविष्लेषणं संस्कृतभाषायां विद्यमानेषु नाट्यशास्त्रीयग्रन्थेषु उपलभ्यते। संस्कृतनाटकानां लक्षणाध्ययनेन सर्वासां भाषाणां दृश्यकाव्यानामभिनये महत्साहाय्यं भवतीत्यसंशयः। अतः अस्मिन् लेखे भरतमुनेः विषये, तस्य नाट्यशास्त्रस्य विषये च विमर्षा क्रियते।

नाट्यशास्त्रीयपरम्परायां भरतमुनेः “नाट्यशास्त्रम्” इति ग्रन्थोऽद्योपलभ्यमान-ग्रन्थेषु प्राचीनतमः। विद्वांस एवमङ्गीकुर्वन्ति यत् “भरतः नाट्यशास्त्रस्य प्रवर्तकः आचार्यः। सः प्राचीनः तथा स्वकीयेन नाट्यशास्त्राख्येन ग्रन्थेन व्यासवाल्मीकिभ्यां सह स्थानमर्हति” इति। केषाञ्चन विदुषामभिप्रायोऽन्यादृशः। “भरत इति व्यक्तेः नाम न किन्तु नटशब्दस्य पर्यायः। नटस्य भरतस्य वा शास्त्रमिति हेतोः भरतनाट्यशास्त्रम्” इति। कोशेऽपि एवमस्ति -

शैलालिनस्तु शैलूषा जायाजीवाः कृशाश्विनः।
भरता इत्यपि नटाश्चारणास्तु कुशीलवाः ॥[1] इति।

अन्ये केचन “वैदिकयुगे शिलालिकृशाश्वाभ्यां भिक्षुसूत्रनटसूत्रयोः निर्माणं यदभवत्, तस्य परम्परा भरतनाम्ना तदनन्तरे काले ख्याता अभवत्। अनेन भरत इति नाट्यपरम्परायाः नाम वर्तते न व्यक्तेः ” इति वदन्ति। भावप्रकाशनेऽपि-

नाट्यवेदाच्च भरताः सारमुद्धृत्य सर्वतः।
सङ्गृह्य सप्रयोगा है मनुना प्रार्थितं व्यधुः ॥[2]इति।

---

[1] अमरकोशः - शूद्रवर्गः-श्लो१२

[2] भावप्रकाशनम् १०-३५

इति भरतशब्दं बहुवचनेन प्रयुङ्क्ते।
किन्तु भरतशब्दस्य नटपर्यायत्वेन नाट्यपरम्परापर्यायत्वेन वा अङ्गीकर्तुं न शक्यते। यतः कालिदासादिभिः व्यक्तिविशेषेणैव भरतस्य नाम परिगृहीतम्। तद्यथा कविकुलगुरुः स्वकीये विक्रमोर्वशीये-

"चित्रलेखे, त्वरय त्वरयोर्वशीम्।
मुनिना भरतेन यः प्रयोगो भवतीष्वष्टरसाश्रयो नियुक्तः |
ललिताभिनयं तमद्य भर्ता मरुतां द्रष्टुमनाः सलोकपालः ॥[3]"
इति भरतं मुनिरिति अङ्गीकरोति।

एवमेव भवभूतेः उत्तररामचरिते – "तं स्वहस्तलिखितं मुनिर्भगवान् व्यसृजद् भगवतो भरतस्य तौर्यत्रिकसूत्रधारस्य।" अपि च "स किल भगवान् भरतस्तमप्सरोभिः प्रयोजयिष्यतीति" [4] इति भरतं व्यक्तिरूपेण अङ्गीकरोति।
नन्दिकेश्वरः अभिनयदर्पणे भरतमुनिना एव नाट्यपरम्परा आगता इति वदति येन भरत इति नाट्यपरम्परायाः नाम इति वादः निरस्यते। तदेवम् –

नाट्यवेदं ददौ पूर्वं भरताय चतुर्मुखः।
ततश्च भरतः सार्धं गन्धर्वाप्सरसां गणैः ॥[5] इति।

दशरूपके धनञ्जयः मङ्गलश्लोके एव भरतं आचार्यरूपेण विष्णुना सह नमस्करोति-

दशरूपानुकारेण यस्य माद्यन्ति भावुकाः।
नमः सर्वविदे तस्मै विष्णवे भरताय च ॥ इति ॥

अभिनवगुप्तोऽपि –
"एकस्य ग्रन्थस्यानेकवक्तृवचनसन्दर्भमयत्वे प्रमाणाभावात्। स्वपरव्यवहारेण पूर्वपक्षोत्तरपक्षादीनां श्रुतिस्मृतिव्याकरणतर्कादिशास्त्रेषु एकविरचितेष्वपि दर्शनात्" इत्युक्त्वा नाट्यशास्त्रस्य अनेककर्तृत्वं निरासयति।

एवं वयं भरतं व्यक्तिरूपेणैव स्वीकुर्मः। अमरकोशोक्तस्य भरताः इति शब्दस्य प्रसिद्धाः प्राचीनव्याख्यानकाराः भरतस्य शिष्याः भरताः इत्यङ्गीकुर्वन्ति।[6]

**नाट्यशास्त्रस्य कालः (भरतमुनेः कालः)**
नाट्यशास्त्रस्य भरतमुनेः वा कालविषये विदुषामेकाभिप्रायो नास्ति। यथा विद्वांसः अद्योपलभ्यमानं महाभारतं "जय-संहिता-भारतं" इति स्तरत्रये रचितमिति आमनन्ति तथा नाट्यशास्त्रस्यापि परिवर्तनं परिवर्धनं च काले काले जातमिति मन्यन्ते। विभिन्नहस्तप्रतिषु लभ्यमानानि पाठान्तराणि च इदं पुष्टीकुर्वन्ति। अद्योपलभ्यमाने नाट्यशास्त्रे प्रायः ६००० श्लोकाः सन्ति। किन्तु द्वादशसहस्रश्लोकात्मकः नाट्यवेदः आसीदिति श्रूयते-

नाट्यवेदाच्च भरताः सारमुद्धृत्य सर्वतः।
सङ्गृह्य सप्रयोगा है मनुना प्रार्थितं व्यधुः ॥
एकं द्वादशसाहस्रैः श्लोकैरेकं तदर्धतः।
षड्भिः श्लोकसहस्रैर्वा नाट्यवेदस्य सम्भवः ॥[7] इति।

अभिज्ञानशाकुन्तलस्य अर्थद्योतनिका-टीकाकारः राघवभट्टः आदिभरतस्य नामोल्लेखम् एवं करोति-

"आरम्भबीजयोर्लक्षणे आदिभरते- औत्सुक्यमात्रबन्धुस्तु यो बीजस्य निबध्यते। महतः फलयोगस्य स खल्वारम्भ इष्यते ॥ इति" [8]

भरतात् पूर्वमेव आदिभरतः द्वादशसाहस्रश्लोकयुतं नाट्यशास्त्रं रचितवान्। तदनुसृत्यैव भरतमुनिना रचितं नाट्यशास्त्रम् अद्योपलभ्यत इति केषाञ्चन विदुषामभिप्रायः। आदिभरतस्य नाम्नि उपलभ्यमानश्लोकेषु एकोऽपि अद्यतन नाट्यशास्त्रे नास्तीत्यतः नाट्यशास्त्रं स्वतन्त्रग्रन्थ इति केचित्। भरत इति व्यक्तेः नाम एव नास्ति। अतः नाट्यशास्त्रम् एककर्तृकं न इति केचित्।
नाट्यशास्त्रस्योपरि अनेकाः टीका आसन्निति सङ्गीतरत्नाकरे शाङ्र्गधरोक्तेनानेन श्लोकेन अवगम्यते-

व्याख्यातारो भरतीये लोल्लटोद्भटशङ्कुकाः।
भट्टाभिनवगुप्तश्च श्रीमत्कीर्तिधरोऽपरः ॥[9] इति।

---

[3] विक्रमोर्वशीयम्। अङ्कः-२ श्लो-१८

[4] उत्तररामचरितम्। ४-अङ्कः। लवस्य वचनम्। पृ.सं-१२०।

[5] अभिनयदर्पणम् श्लो-२

[6] "भरतस्य मुनेः शिष्याः अणि, संज्ञापूर्वकत्वात् वृद्ध्यभावे च भरताः" इत्यमररसालः॥ "भरतस्य मुनेः शिष्याः। अण्(४-३-१२०)। संज्ञापूर्वकत्वान्न वृद्धिः। .....पूर्वव्याख्या विरोधाच्च। " इत्यमरव्याख्यासुधा ॥

[7] भावप्रकाशनम् १०-३४-३५

[8] अर्थद्योतनिका टीका प्रथमाङ्कस्य पञ्चमश्लोकस्योपरि।

किन्तु अद्य अभिनवगुप्तस्य अभिनवभारतीति एकैव टीका उपलभ्यते। अभिनवगुप्तस्य कालः क्रिस्ताब्दः १३ शतकम्। यद्यपीयं टीका नातिप्राचीना तथापि नात्यर्वाचीना इत्यतः अभिनवभारतिरेव प्रमाणमिति मत्वा नाट्यशास्त्रस्य अध्ययनं वरमिति विदुषामभिप्रायः मयापि अङ्गीकृतः। नाट्यशास्त्रम् एककर्तृकं, भरतमुनिविरचितम् इति मन्यमानेष्वपि भरतस्य कालविषये एकाभिप्रायः नास्ति। "वाचस्पति गैरेला " महोदयः [10] नाट्यशास्त्रस्य कालविषये विदुषामभिप्रायं सङ्ग्रह्य एवं लिखति –

श्री कन्हैयालाल-पोद्दारः – वैदिककालादारभ्य पौराणिककालपर्यन्तम्।

म.म. हरप्रसादशास्त्रिणः – क्रिस्तोः पूर्वम् २००।

म.म.पि.वि.काणे – क्रिस्तपूर्वादारभ्य कालिदासस्य कालपर्यन्तम्।

डा. मनमोहनघोषः – क्रिस्तशकादारभ्य २००।

प्रो.बे.कीथः – क्रिस्तशकादारभ्य ३००।

प्रो.मेक्-डोनलः – क्रिस्तशकादारभ्य ६००।

सुशीलकुमार दे – क्रिस्तशकादारभ्य ८००।

भासनाटकचक्रस्य अवलोकनेन विद्वांसः अभिप्रयन्ति यत् भासः नाट्यशास्त्रस्य नियमानाम् उल्लङ्घनं कृतवान्। अतः सः भरतपूर्वीयः समकालीनो वा स्यादिति। सः स्वकीयेषु त्रयोदशनाटकेषु एकत्रापि भरतमुनेः नामोल्लेखं न करोति। कालिदासः भासभरतयोः नाम गृह्णाति। अतः भरतमुनेः कालः भासकालिदासयोः कालयोः मध्ये अन्तर्भवितुमर्हतीति वक्तुं शक्नुमः। किन्तु अनेनापि भरतमुनेः कालनिर्धारणं दुस्साध्यं यतः भासकालिदासयोः कालः न निर्धारितः।

## नाट्यशास्त्रस्य प्रकाशनम्[11]

- H.H.Wilson महोदयः ऐदम्प्राथम्येन क्रिस्ताब्दस्य १८२६तमे वर्षे नाट्यशास्त्रस्य कांश्चन भागान् स्वकीये "Select Specimens of the Theatre of Hindus " इत्यस्मिन् ग्रन्थे लिलेख। किन्त्वधुना तत्सर्वं नष्टमिति J.Grosset महोदयः(क्रिस्ताब्दः.१८८८) वदति।
- F.Hall महोदयः क्रिस्ताब्दस्य १८६५तमे वर्षे दशरूपकस्य प्रकाशनावसरे तत्सम्बद्ध-नाट्यशास्त्रस्य अध्यायानपि परिषिष्टभागे स्थापितवान्। एषोऽस्यानन्तरं नाट्यशास्त्रस्य ग्रन्थसम्पादनार्थं प्रयतत किन्तु सामग्र्यभावत् तत्पूर्णं कर्तुं न शशाक।
- क्रिस्ताब्दस्य १८७४तमे वर्षे Heymann इत्याख्यः जर्मन्-देशीयः विद्वान् तत्काले लभ्यमानाः सर्वाः हस्तप्रतीः सङ्ग्रह्य नाट्यशास्त्रमुद्दिश्य अमूल्यं लेखनं प्राकाशयत्।
- फ्रान्स्-देशीयः संस्कृतज्ञः P.Regnaud महोदयः क्रिस्ताब्दस्य १८८०तमे वर्षे अष्टादशतमम् अध्यायं तथा क्रिस्ताब्दस्य १८८४तमे वर्षे पञ्चदशतमं षोडशतमं चाध्यायौ भागशः मुद्रापयत्। अस्य अन्तेवासी J.Grosset इत्याख्यः फ्रान्स्-विद्वान् क्रिस्ताब्दस्य १८८८तमे वर्षे अष्टादशतमं नाट्यशास्त्राध्यायं मुद्रापयत्।
- क्रिस्ताब्दस्य १८९०तमे वर्षे Sylavain Levi महाभागः नाट्यशास्त्रस्य तिस्रः सम्पूर्णाः हस्तप्रतीः प्रापयत्। किन्तु तस्य सम्पूर्णस्य नाट्यशास्त्रस्य प्रकाशने आसक्तिर्नासीत्। सः नाट्यशास्त्रमधीत्य दशरूपक-साहित्यदर्पणादिभिः सह तुलनात्मकमध्ययनं कृतवान्। यद्यपि Levi महाशयेन समग्रं-नाट्यशास्त्रं न प्रकाशितं तथापि अस्य अध्ययनेन नाट्यशास्त्राध्ययने अन्येषां विदुषाम् आसक्तिः अवर्धयत्।
- क्रिस्ताब्दस्य १८९४ तमे वर्षे पण्डितशिवदत्तमहोदयः तथा काशीनाथपाण्डुरङ्गमहोदयः च मुम्बई-नगरे काव्यमालाप्रकाशने नाट्यशास्त्रस्य मूलश्लोकानां सम्पूर्ण-ग्रन्थसम्पादनं कृतवन्तौ।
- पुनः २०तमस्य शताब्दस्य आदौ काश्मीर-पण्डितस्य अभिनवगुप्तस्य अभिनवभारतीति व्याख्या लब्धा। तदनुसृत्य बहवः नाट्यशास्त्रग्रन्थाः प्रकाशिताः। तेषु "Gaekwad's Orietal Series" इत्यस्मिन् प्रकाशने, क्रिस्ताब्दस्य १९४३ तमे वर्षे, एम्. रामकृष्णकविवर्येण अभिनवभारत्या सह सम्पादिता नाट्यशास्त्रग्रन्थः प्रसिद्धः समग्रश्च वर्तते। अधुनापि अयं ग्रन्थः प्रकाशितः लभ्यते च।

## नाट्यशास्त्रस्य सार

1. प्रथमाध्यायस्य प्रधानविषयः नाट्योत्पत्तिः [12] । अस्मिन्नध्याये देवानां प्रार्थना, ब्रह्मणा कृतं नाट्यवेदस्य निर्माणं, ब्रह्माज्ञया भरतेन स्वशतपुत्राणां

[9] सङ्गीतरत्नाकरः - अ -१ (स्वरगताध्यायः)। श्लो-१९ ।

[10] "भारतीयनाट्यपरम्परा और् अभिनयदर्पण" इति ग्रन्थस्य २९तमे पृष्ठे।

[11] मनमोहनघोषस्य मतम् अपि च परिमलप्रकाशनस्य के.एल्.जोषि-महाभागस्य मतमनुसृत्य विवरीतम् ।

[12] इमे प्रधानविषयाः उक्ताः अध्यायेषु वर्तमानप्रधानविषयान् द्योतयति । तत्तु नाट्यशास्त्रस्य अभिनवभारत्या च पुष्पिकामनुसृत्य प्रदत्तम् ।

नाट्यस्याध्यापनम्, भरतस्य शतपुत्राणां नामानि, नाट्यप्रयोगारम्भः, तत्र दैत्येभ्यः विघ्नः, जर्जरसमुद्भवः, विश्वकर्मणा ब्रह्माज्ञया नाट्यमण्डपनिर्माणम्, ब्रह्मणा मण्डपरक्षणविधौ देवानां नियोजनम् इत्यादिविषयाः चर्चिताः।

2. द्वितीयाध्यायस्य प्रधानविषयः मण्डपविधानम्। अस्मिन्नध्याये नाट्यग्रहलक्षणम्, नाट्यग्रहस्य त्रिविधः सन्निवेशः (विकृष्टः चतुरश्रः त्यश्रः चेति), तेषां त्रीणि प्रमाणानि (ज्येष्ठं मध्यं अवरं चेति), रङ्गगृहं, नेपथ्यगृहं, भित्तिकर्म, ब्राह्मणक्षत्रियवैश्यशूद्रेति चतुष्प्रकारकस्थम्भानां स्थापनम्, तेषां स्थम्भानामधः प्रधातव्यवस्तूनि, मत्तवारुणी, रङ्गशीर्षं, काष्ठविधिः, भित्तिकर्म, चित्रकर्म इत्यादिविषयाः चर्चिताः।
3. तृतीयस्य अध्यायस्य प्रधानविषयः रङ्गदैवतपूजनम्। अस्मिन्नध्याये गोनिवासन-पूर्वकरङ्गगृहशुद्धिः, देवतास्तुतिः, जर्जरपूजनम्, देवतानिवेशनपूर्वकपूजाविधिः, बलिकर्म, हवनविधिः, रङ्गपूजनफलम् इत्यादयः विषयाः चर्चिताः।
4. चतुर्थाध्यायस्य प्रधानविषयः ताण्डवविधानम् वर्तते। अत्र अमृतमथनसमवकारस्य प्रयोगः, त्रिपुरदाहडिमस्य प्रयोगः, शुद्धश्चित्रश्चेति पूर्वरङ्गद्वैविध्यम्, शिवेन भरतोपदेशाय तण्डोः निर्देशः, द्वात्रिंशत् अङ्गहाराः, करणलक्षणम्, अष्टोत्तरशतकरणानि, रेचकाः, ताण्डवः, नृत्तप्रयोगविषयाः इत्यादिविषयाः चर्चिताः।
5. पञ्चमेऽध्याये प्रधानविषयः पूर्वरङ्गविधानम्। अस्मिन्नध्याये पूर्वरङ्गलक्षणम्, तस्य अङ्गानि, प्रत्याहाराः, तेषां लक्षणानि, दैत्यानां क्षोभः, तन्निवारणम् इत्यादिविषयाः चर्चिताः।
6. षष्ठोऽध्यायस्तु रसाध्यायः इति विश्रुतः। अत्र तु नाट्ये रसभावादिसङ्ग्रहः, अष्टौ रसाः, स्थायिभावाः, सञ्चारिभावाः, सात्त्विकभावाः, चतुर्विधाभिनयः, द्विविधो धर्मिः, चतुर्विधाः वृत्तयः, चतुर्विधाः प्रवृत्तयः, द्विविधा सिद्धिः, द्विविधौ स्वरौ, चतुर्विधम् अतोद्यं, पञ्चविधं गानं, त्रिविधो रङ्गः, नाट्यरसव्याख्यानम्, रसनिष्पत्तिसूत्रम्, अष्टरसानां विवरणम् इत्यादिविषयाः उक्ताः।
7. सप्तमस्याध्यायस्य नाम वर्तते भावव्यञ्जकत्वम् इति। अस्मिन्नध्याये भावः, विभावः, अनुभावः, अष्टौ स्थायिभावाः, द्वात्रिंशत् व्यभिचारिभावाः, अष्टौ सात्त्विकभावाः, एतेषां विनियोगः इत्यादिविषयाः चर्चिताः।
8. अष्टमोऽध्यायः आङ्गिकाभिनयसम्बद्धः वर्तते। अभिनयशब्दस्य निरुक्तिः, अभिनयस्य चातुर्विध्यम्, आङ्गिकाभिनयस्य त्रैविध्यम्, नाट्ये षडङ्गानि, उपाङ्गानि, शिरोभिनयस्य त्रयोदशभेदाः, दृष्टयः, तेषां भेदाः विनियोगाश्च, ताराकर्माणि, दर्शनस्य अष्टौ प्रकाराः, पुटकर्मणः नवभेदाः, सप्तविधभ्रूकर्माणि, षण्णासिककर्माणि, षड्गण्डकर्माणि, अधरस्य षट्कर्माणि, चिबुककर्माणि, ग्रीवायाः नवकर्माणि, एतेषां विनियोगाश्च चर्चिताः।
9. नवमोध्यायः पुष्पिकायां उपाङ्गाभिनयः इत्युक्तः। परन्तु अत्र चर्चिताः विषयाः आङ्गिकाभिनयसम्बद्धाः एव। असंयुतहस्ताः, संयुतहस्ताः तेषां लक्षणानि विनियोगश्च। हस्ताभिनये विधिः, हस्तानां कर्माणि, नृत्तहस्तप्रयोगः, हस्तानां करणानि, उरसः पञ्चकर्माणि, पार्श्वस्य पञ्चकर्माणि, त्रीणि जठरकर्माणि, कटीकर्माणि पञ्च, ऊरु-कर्माणि पञ्च, जङ्घा-कर्माणि पञ्च, पादकर्माणि पञ्च इत्यादिविषयाः अत्र चर्चिताः।
10. दशमोऽध्यायः चारीविधानम् इत्युक्तः अभिनवगुप्तेन पुष्पिकायाञ्च। चारीशब्दस्य निर्वचनं, करणखण्डमण्डलानां लक्षणानि, भूमिचार्यः षोडश, आकाशचार्यः षोडश, स्थानस्य षड्भेदाः, तेषां विनियोगाश्च, आहारव्यायामनियमौ इत्यादिविषयाः अध्यायेऽस्मिन् चर्चिताः।
11. एकादशाध्यायस्य नाम मण्डलविधानम् इति। अत्र आकाशगमण्डलानि दश, भौममण्डलानि दश, तेषां लक्षणानि च चर्चितानि।
12. द्वादशाध्यायस्य प्रधानविषयः गतिप्रचारः। अस्मिन्नध्याये पात्राणां रङ्गप्रवेशविधिः, गतौ लयः, उत्तमानां स्वभावगतिः, दिवौकसानां गतिः, राज्ञां देवानुकरणं, रसानुगुण्येन गतिः, यतीनां व्रतिनां पाशुपतानां गतिः, रथविमाननौकाश्वस्थानां गतिः, विटस्य बालस्य वृद्धस्य मत्तानाम् उन्मत्तानां च गतिः, स्त्रीपुरुषाणां गतिः, स्त्रियः पुरुषाभिनये पुरुषस्य स्त्रीवेशे च गतिः अत्र विवरीताः। भिन्नभिन्न-सन्दर्भेषु आसनविधिः चात्रोक्तः।
13. त्रयोदशोऽध्यायः करयुक्तिधर्मीव्यञ्जकः इत्युक्तः। स्थानविभागः, प्रवेशनिष्क्रमणविधिः, कक्ष्याविधिः च आदावुक्ताः। अग्रे दाक्षिणात्या-आवान्तिका-औढ्रमागधी-पाञ्चालमध्यमेति चतस्रः प्रवृत्तयः उक्ताः तासां लक्षणानि प्रयोजनानि च। लोकधर्मीनाट्यधर्मी चेति धर्मीद्वैविध्यं चोक्तम्।
14. चतुर्दशोऽध्यायः वागभिनयः छन्दोविधानम् इति प्रसिद्धः। वागभिनयस्य प्राधान्यम्, अक्षरमाला, वर्णोत्पत्तिस्थानानि, नामाख्यातोपसर्गनिपात-प्रत्ययतद्धितविभक्तिसन्धिसमासाः। छन्दांसि –गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्तिः, त्रिष्टुप्, जगती, अतिजगती, शक्वरी, अतिशक्वरी, अष्टिः, धृतिः, अतिधृतिः, कृतिः, प्रकृतिः, आकृतिः, विकृतिः, सङ्कृतिः, अभिकृतिः, उत्कृतिः , एतेषां छन्दसां लक्षणानि, गुरुलघुलक्षणम्, इत्यादिविषयाः विवृताः।

15. पञ्चदशाध्यायस्य वृत्तलक्षणम् इति नाम दत्तम्। तनुमध्या, मकरशीर्षा, मालिनी, उद्धता, भ्रमरमाला, सिंहलेखा, मत्तचेष्टितम्, विद्युन्माला, चित्रविलसितम्, मधुकरी, उत्पलमाला, शिखिसारिणी, दोधकं, मोटकं, इन्द्रवज्रा, उपेन्द्रवज्रा, रथोद्धता, स्वागता, शालिनी, तोटकं, कुमुदप्रभा, कुमुदनिभा, चन्द्रलेखा, प्रमिताक्षरा, वंशस्था, हरिणप्लुता, कामदत्ता, अप्रमेया, पद्मिनी, पुटवृत्तं, प्रभावती, प्रहर्षिणी, मत्तमयूरकः, वसन्ततिलका, असम्बाधा, शरभा इत्यादयः आर्याः सलक्षणाः उक्ताः। आर्याणां सामान्यलक्षणं यतिनियमश्च उक्ताः।
16. षोडशाध्यायस्य नाम काव्यलक्षणम् अथवा लक्षणालङ्कारदोषगुणाध्यायः इति। विभूषणम्, अक्षरसङ्घातः, शोभा, अभिमानः, गुणकीर्तनं, प्रोत्साहनं, उदाहरणं, निरुक्तं, गुणानुवादः, हेतुः, सारूप्यं, मिथ्याध्यवसायः, सिद्धिः, पदोच्चयः, आक्रन्दः, मनोरथः, आख्यानं, याञ्चा इत्यादीनि परिदेवनं पर्यन्तानि द्वात्रिंशल्लक्षणानि उक्तानि। उपमा-दीपक-यमक-रूपकाख्याः अलङ्काराः तेषां भेदाश्च उक्ताः। काव्यदोषाः गुणलक्षणानि च विवृतानि।
17. सप्तदशोऽध्यायः काकुस्वरव्यञ्जनम् इति प्रसिद्धः। प्राकृतलक्षणं तद्भेदत्रयं, भाषायाः अतिभाषा आर्यभाषा जातिभाषा अन्यन्तरी भाषा चेति चत्वारो भेदाः , संस्कृत-प्राकृतयोः प्रयोगः , मागधी आवन्ती शूरसेनी दाक्षिणात्या इत्यादिभाषाः, पात्राणां सम्भोधनविधिः इत्यादिविषयाः अस्मिन्नध्याये चर्चिताः।
18. अष्टादशोऽध्यायः दशरूपकलक्षणम् इति विश्रुतः। नाटकं, प्रकरणम्, अङ्कः, व्यायोगः, भाणः, समवकारः, वीथी, प्रहसनं, डिमः, इहामृगः इति दशरूपकाणि तेषां लक्षणानि च अत्र चर्चितानि।
19. एकोनविंशोऽध्यायस्तु सन्धिनिरूपणम् इति नाम्ना प्रसिद्धः। प्रासङ्गिकम् आनुषङ्गिकं चेति इतिवृत्तम् , फलारम्भः प्रयत्नः प्राप्तिसम्भवं फलप्राप्तिः फलयोग इति पञ्चावस्थाः, बीजं बिन्दुः पताका प्रकरी कार्यम् चेति अर्थप्रकृतयः, मुखं प्रतिमुखं गर्भः विमर्शः निर्वहणं चेति पञ्चसन्धयः, विष्कम्भः चूलिका प्रवेशकः अङ्कावतारः अङ्कमुखञ्चेति अर्थोपक्षेपकाः चात्र विवरीताः।
20. विंशतितमाध्यायस्य प्रसिद्धं नाम वृत्तिविकल्पनम् इति वर्तते। अस्मिन्नध्याये वृत्तीनां समुत्थानम् , भारती सात्त्वती कैशिकी आरभटी चेति चतस्रः वृत्तयः विवरीताः।
21. एकविंशाध्यायस्य प्रधानविषयः आहार्याभिनयः वर्तते। पुस्तः अलङ्कारः अङ्गरचना तथा सज्जीवम् चेति चतुर्विधं नैपथ्यम् अत्रोक्तम्। पुस्तानाम् अलङ्काराणाम् अङ्गरचनानां सज्जीवानां प्रकाराश्च उक्ताः।
22. द्वाविंशोऽध्यायः सामान्याभिनय इत्युक्तः पुष्पिकायाम्। सामान्याभिनयस्य सम्भवत्त्वम् , हावः भावः हेला च, लीलादिविहृतपर्यन्तं दशस्वभावजाः, शौर्यादि औदार्यपर्यन्तं सप्त अयत्नजाः, पुरुषाणामष्ट सत्त्वभेदाः, वाक्यादयः षट् शरीराभिनयाः, आलाप-प्रलाप-विलाप-अनुलाप-संलाप-अपलाप-सन्देश-अतिदेश-निर्देश-उपदेश-अपदेश-व्यपदेशाख्याः द्वादश वाचिकाभिनयाः, प्रत्यक्षपरोक्षादयः सप्तप्रकाराः वाचिकमार्गाः, शब्दादीनां भावाभिनयः, स्त्रीणां स्वभावानुसारं देवदानवगन्धर्वरक्षोनागेत्यादयः प्रकाराः, अभिलाशचिन्तनेत्यादिदशस्थानगतः कामः, वासकसज्जिका विरहोत्कण्ठिता स्वाधीनभर्तृका कलहान्तरिता खण्डिता विप्रलब्धा पोषितभर्तृका अभिसारिका चेति अष्टविधनायिकाः, रङ्गे किं न कार्यमित्यादिविषयाः अत्र विवरीताः।
23. त्रयोविंशोऽध्यायः वैशिकोऽध्यायः इति विश्रुतः। धात्र्यादिस्त्रीभेदाः, स्त्रीणां स्वभावः, स्त्रीणां त्रिविधा प्रकृतिः, पञ्चविधपुरुषाः इत्यादिविषयाः अत्र चर्चिताः।
24. चतुर्विंशोऽध्यायः पुंस्त्र्युपचाराः इति प्रख्यातः। स्त्रीणां पुरुषाणां च उत्तमाधममध्यमेति त्रिविधा प्रकृतिः , धीरोदात्तः धीरललितः धीरोद्धतः धीरशान्तश्चेति चत्वारः नायकप्रकाराः, नायकस्य लक्षणं नायिकालक्षणञ्च, महादेवी देवी स्वामिनी स्थापिता भोगिनी शिल्पकारिका नाटकीया नर्तकी अनुचारिका परिचारिका सञ्चारिका प्रेषणकारिका महत्तरी प्रतीहारी कुमारी स्थाविरा चेति अन्तःपुरे राजोपचारिणः इत्यादयः विषयाः विवृताः।
25. पञ्चविंशाध्यायस्य नाम चित्राभिनय इति। अङ्गाद्यभिनयेष्वनुक्ताः केचित् विषयाः चित्राभिनयः इत्यस्मिन्नध्याये उक्तः। उदाहरणार्थं-चन्द्रज्योत्स्नादीनामभिनयः, विद्युदभिनयः, सिंहादीनां निरूपणं, शरदादि ऋतूनामभिनयः। दूरस्थाभाषणम्, आत्मगतम्, अपवारितम्, जनान्तिकम् चेति वाचः प्रकारः उक्तः।
26. षड्विंशोऽध्यायः प्रकृतिविकल्पः विकृतिविकल्प इति वा प्रसिद्धः। त्रिप्रकारा प्रकृतिः स्त्रीभिः प्रयोगः कार्यः। रम्भोर्वशीनामुदाहरणम्, स्त्रीणामकर्तव्याः, डिमादयः पुरुषप्रयोज्याः इत्यादिविषयाः चात्र चर्चिताः।
27. सप्तविंशोऽध्यायः सिद्धिव्यञ्जक इति प्रसिद्धः। सिद्धीनां लक्षणं, दैवी मानुषी चेति द्विविधा सिद्धिः , मनुष्यसिद्धिः दशाङ्गा, दैवसमुत्थिताः घाताः , आत्मसमुत्था-परसमुत्थाः घाताः, प्रेक्षकानां लक्षणम् इत्यादिविषयाः चर्चिताः।
28. अष्टाविंशोऽध्यायः जातिविकल्पनम् इति कथितः। ततम्, अवनद्धं, घनं, सुषिरं चेति चतुर्विधमातोद्यं सलक्षणम्

अत्रोक्तम्। स्वराः, मूर्छनाः, तानाः, जातयश्चेति गान्धर्वस्य लक्षणानि चोक्तानि।

29. एकोनत्रिंशोऽध्यायः आतोद्यविधानम् इति प्रसिद्धः। रससंश्रयाः जातयः, वर्णालङ्कारलक्षणं, गीतयः, चत्वारः धातवः, तिस्रो वृत्तयः, आश्रवणा आरम्भः वक्त्रपाणिः सङ्खोटना परिघट्टना चेति निर्गीतविधानम् अध्यायेऽस्मिन् विवरीतानि। अस्याध्यायस्य पाठान्तरोऽपि वर्तते।
30. त्रिंशोऽध्यायः सुशिरातोद्यविधानम् इति नाम्ना प्रसिद्धः। वंशगतानां स्वराणां विषयविवरणाय अयमध्यायः प्रवृत्तः।
31. एकत्रिंशोध्यायस्तु तालाध्यायः इति कथितः। द्रुत-मध्य-विलम्बिताः लयाः, चञ्चत्पुटः चाचपुटश्चेति तालद्वैविध्यम् , हस्ताङ्गुलिविकल्पनम्, कण्डिकानां प्रयोगः, गीताङ्गानि, लास्यस्य लक्षणं तत्प्रयोगः इत्यादिविषयाः अत्र विवरीताः।
32. द्वात्रिंशाध्यायस्य नाम ध्रुवाध्याय इति। ध्रुवालक्षणं, ध्रुवाणां पञ्चभेदाः, ध्रुवजातयः, श्री विद्युत् धृतिः त्रियामा प्रतिष्ठा सुप्रतिष्ठा मत्ताली जया विजया विस्मया इत्याद्यानां विवरणम् , पञ्चविधं गानं, ध्रुवाणां प्रयोगः इत्यादिविषयाः अस्मिन्नध्याये चर्चिताः।
33. त्रयस्त्रिंशोऽध्यायः गुणदोषविचार इत्युक्तः। अस्मिन्नध्याये गातृवादकयोः गुणदोषविचार एव चर्चितः।
34. चतुस्त्रिंशोऽध्यायः पुष्पिकायां पुष्करवाद्याध्यायः इत्युक्तः। अवनद्धस्य लक्षणम्, अवनद्धभेदाः, वाद्यसंश्रयाः, आतोद्यलक्षणम्, चर्मलक्षणं, वादकगुणाः, इत्यादिविषयाः अस्मिन्नध्याये चर्चिताः। अस्याध्यायस्यापि पाठान्तरम् उपलभ्यम्।
35. पञ्चत्रिंशोऽध्यायः भूमिकाविकल्प इत्युक्तः। भूमिकाविन्यासः अस्मिन्नध्याये चर्चितः।
36. षट्त्रिंशोऽध्यायस्तु नाट्यशाप इति विश्रुतः। पूर्वरङ्गविधानकथा, नाट्यशास्त्रं प्रति मुनीनां शापः अस्याध्यायस्य सारः वर्तते।
37. सप्तत्रिंशाध्यायस्य नाम गुह्यतत्त्वकथनम् इति वर्तते। नहुषस्यवृत्तान्तम्, नाट्यावतारः, नाट्यशास्त्रस्य माहात्म्यम् चात्र विवृतम्।

अत्रेदं अवगन्तव्यं यत्, नाट्यशास्त्रस्य अद्यतन आवृत्तिषु बहूनि पाठान्तराणि उपलभ्यन्ते। न केवलं श्लोकाः किन्तु केचन अध्याया अपि पूर्णतया पाठान्तरेण उपलभ्यन्ते। कुत्रचित् अध्यायविभागेष्वपि भिन्नता दृश्यते। अतः अभिनवभारती टीकानुसारं नाट्यशास्त्रस्य अध्ययनं वरमिति मत्त्वा तत्प्रकारेणात्र अध्यायसारः सङ्गृहीतः।

## संदर्भ


१. नाट्यशास्त्रविश्वकोशः, राधावल्लभत्रिपाठी, प्रतिभा प्रकाशनम् दिल्ली, १९९९

२. नाट्यशास्त्रम् , श्रीमदभिनवभारती-युतम्,प्रथम-द्वितीय-तृतीय-चतुर्थभागाः, भरतमुनिः, अभिनवगुप्तः / एम्.रामकृष्णकविः, ओरियेण्टल् इन्स्टिट्यूट् बरोडा, १९५६

३. नाट्यशास्त्रम्, भरतमुनिः / पण्डितशिवदत्तः,काशीनाथपाण्डुरङ्गपरबः, निर्णयसागरमुद्रणालयः मुम्बयी, १८९४

४. नाट्यशास्त्रम्, अभिनवभारती-व्याख्या मनोरमाहिन्दीव्याख्याभागः -१,२,३,४, भरतमुनिः ,अभिनवगुप्तः/डा. पारसनाथद्विवेदी, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, वारणसी,२००१

५. नाट्यशास्त्रम्, अभिनवभारतीयुतम् भागः -१,२,३,४, भरतमुनिः, अभिनवगुतः/रविशङ्कर नागर, के.एल्.जोशी, परिमल पब्लिकेशन्स दिल्ली,२०१२